श्री गणेशाय नमः

॥ अथ ॥

# * पुलस्त्यस्मृतिः *

## वर्णाश्रमधर्मवर्णनम्

कुरुक्षेत्रे महात्मानं पुलस्त्यमृषयोऽब्रुवन् ।
तांश्च धर्मान्प्रकारांश्च नो वद स्मार्तमागमम् ॥ १ ॥
एवं पृष्टः प्रत्युवाच सर्वांस्तान् पृच्छत ऋषीन् ।
पंचधा वास्थितं धर्मं शृणुध्वं द्विजसत्तमाः ॥ २ ॥
वर्णधर्मः स्मृतस्त्वेक आश्रमाणामतः परम् ।
वर्णाश्रमस्तृतीयस्तु गुणनैमित्तिकस्तथा ॥ ३ ॥
वर्णमेकं समाश्रित्य योऽधिकारः प्रवर्तते ।
वर्णधर्मः स विज्ञयो यथोपनयनं त्रिषु ॥ ४ ॥
यस्त्वाश्रयं समाश्रित्य पदार्थः संविधीयते ।
उक्त आश्रमधमस्तु भिक्षापिण्डादिकं तथा ॥ ५ ॥
उभयस्य निमित्तेन यो विधिः सम्प्रवर्तते ।
नैमित्तिकः सविज्ञेयः प्रायश्चित्तविधिर्यथा ॥ ६ ॥
ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः ।
उक्त आश्रमधर्मस्तु राजधर्मस्तु पञ्चमः ॥ ७ ॥

वर्णधर्मश्चतुर्णां यः आश्रमाणां तथैव च ।
द्वयोः साधारणो धर्मो यश्चासौद्वयशेषभाक् ॥ ८ ॥
इज्याध्ययनदानानि यथाशास्त्रं सनातनम् ।
ब्रह्म क्षत्रिय वैश्यानां सामान्यो धर्म उच्यते ॥ ९ ॥
याजनाध्ययने राज्ञो भूतानाञ्चाभिरक्षणम् ।
पाशुपाल्यं कृषिश्चैव वैश्यस्याजीवनं स्मृतम् ॥१०॥
शूद्रस्य द्विजशुश्रूषा द्विजानामनुपूर्वशः ।
शूद्रा च वृत्तिस्तत्सेवा कारु (कारुण्यं) कर्म (तथैव) च ॥११॥
गुरौवासोऽग्निशुश्रूषा स्वाध्यायो व्रत धारणि (णं) ।
त्रिकालस्नापिता भृत्यै गुरौ प्राणांतिकी स्थितिः ॥१२॥
तदभावे गुरुसुते तथा सब्रह्मचारिण (णि) ।
कामतो वा समानत्वं स्वधर्मो ब्रह्मचारिणः ॥१३॥
समेखलो जटी दण्डी मुंडी गुरुगृहाश्रयः ।
अन्यथा ग्रहण(गृहमेधित्वं) गच्छेत्कामतो वाश्रमांतरम् ॥१४॥
अग्निहोत्रोपचरणं जीवनञ्च स्वकर्मभिः ।
धर्मदानेषु काम्येषु सर्वत्रजन (ध) विक्रयाः ॥१५॥
देवपित्र्यतिथिभ्यश्च भूतानामानुकम्पिता ।
श्रुतिस्मृत्युक्तसंस्कारो धर्मोऽयं गृहमेधिनः ॥१६॥
जटित्वमग्निहोत्रित्वं भूशय्याजिनधारणम् ।
वनेवासः पयोमूलनीवारकणवृत्तिता ॥१७॥
प्रतिग्रहनिवृत्तिश्च त्रिःस्नानं मौनधारणम् ।
देवतातिथिपूजा च धर्मोऽयं वनवासिनाम् ॥१८॥

सर्वारंभपरित्यागो भैक्षान्नं वृत्तमूलता ।
निष्परिग्रहता द्रोहः समता सर्वजन्तुषु ॥१९॥
प्रियाप्रियपरिष्वङ्गः सुखदुःखाविकारिता ।
स बाह्याभ्यन्तराशौचं नियमो व्रतकारिता ॥२०॥
सर्वेन्द्रियसमाहारो धारणाध्याननित्यता ।
भावशुद्धिस्तथेत्येवं परिव्राड्धर्म उच्यते ॥२१॥
अहिंसा सत्यवादश्च सत्यं शौचं दया क्षमा ।
वर्णिनां लिङ्गिनाञ्चैव सामान्यो धर्म उच्यते ॥२२॥
स्वज्ञानं हृदि सर्वेषां धर्मोऽयं वर्णिलिङ्गिनाम् ।
अदृष्टार्थो द्विविधः (द्विधा) प्रोक्तो दृष्टार्थश्चद्वितीयकः ॥२३॥
उभयार्थस्तृतीयश्च न्यायमूलश्चतुर्थकः ।
उभयाव्यवहारश्च दंडधारणमेवच ॥२४॥
तुल्यार्थानां विकल्पःस्या न्न्यायमूलः प्रकीर्त्तितः ।
वेदे तु विदितो धर्मः स्मृतौ तादृश एव तु ॥२५॥
अनुवाकः श्रुतिसूक्तं कार्यार्थमिति मानवाः ।
तदर्थश्च प्रयासोऽयं सच सेव्यः फलार्थिना ॥२६॥
उक्तः पञ्च विधो धर्मः श्रेयोऽभ्युदयहेतुकः ।
पुरुषाणां यथायोगं सच सेव्यः फलार्थिना ॥२७॥
सद्यस्तु प्रौढ़बालायामन्यथा वत्सराच्छुचिः ।
प्रदाता यां त्रिरात्रेण दत्तायां पक्षिणी भवेत् ॥२८॥

इति पुलस्त्यप्रोक्तं धर्मशास्त्रं समाप्तम् ।
( प्रक्षिप्तोऽयं प्रतिभात्यन्तिमः श्लोकः )

THE

# SMRITI SANDARBHA

Collection of Thirteen Dharmashastric Texts by Maharshis.

## Volume IV

NAG PUBLISHERS
11.A/U.A. JAWAHAR NAGAR (P. O. BUILDING)
DELH-I110007